अ. स्वामी विवेकानन्दः अमेरिकादेशे भारतीयसंस्कृतेः प्रचारं करोति स्म। कश्चन श्रोता उपहासपूर्वकम् उक्तवान्–'अहो भारतीयसंस्कृत्याः विसंगतिः। लक्ष्म्याः वाहनम् उलूकः सरस्वत्याः वाहनं हंस इति। विवेकानन्दः अवदत् – एष एव अस्माकं भवतां मध्ये दृष्टिभेदः। धनाधीनः जनः उलूकवत् आचरति। विवेकम् आश्रितः नरः विद्वान् भवति अतः एव सरस्वत्याः वाहनं हंसः लक्ष्म्याः वाहनम् उलूकः इति।

**I. एकपदेन उत्तरत**
**एकपद में उत्तर लिखिए**
**Answer in one word only** ½x4=2

(i) स्वामी विवेकानन्दः कुत्र भारतीय–संस्कृतेः प्रचारं करोति स्म?
(ii) धनाश्रितः जनः कथम् आचरति?
(iii) कम् आश्रितः नरः विद्वान् भवति?
(iv) उलूकः कस्याः वाहनम्?

**II. पूर्णवाक्येन उत्तरत**
**पूर्णवाक्य में उत्तर दीजिए**
**Answer in a complete sentence** 2x1=2

a. 'एष एव अस्माकं भवतां मध्ये दृष्टिभेदः'। अत्र 'अस्माकं' पदं कस्मै प्रयुक्तम्?
b. उपहासपूर्वकम् इति कस्य क्रियापदस्य विशेषणम्?

**III. यथानिर्देशमुत्तरत**
**निर्देश के अनुसार उत्तर लिखें**
**Do as directed** 1
**'कश्चन श्रोता उक्तवार' अस्मिन् वाक्ये क्रियापदं चिनुत।**

2. **अधोलिखित–अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरपुस्तिकायाम् उत्तरत**
**निम्नलिखित अनुच्छेद को पढ़कर दिये गये प्रश्नों के उत्तर उत्तरपुस्तिका में लिखिए**
**Read the following passage and answer the questions in the given answer sheet in Sanskrit.**

वर्तमानयुगम् विज्ञानमयम्। अस्माकं सर्वासु क्रियासु विज्ञानतत्त्वानि एव विराजन्ते। पठनक्रियाम् एव पश्यन्तु। पठने अपि विज्ञानस्य सिद्धान्ताः अनुकरणीयाः। यदि न करिष्यामः तर्हि नेत्रयोः विकारः भवितुं शक्नोति। पुस्तकं यदि नेत्रयोः अति

समीपे भवति तर्हि पठितुं न शक्यते। यदा पुस्तकम् अतिदूरं भवति तदा अपि पठनं दुष्करं भवति। नेत्रविशेषज्ञा: कथयन्ति यत् प्राय: पञ्चविंशतिसेण्टिमीटरमितं (25 सै.मी) दूरम् अन्तरं समीचीनं भवति। तावद्दूरं पुस्तकं गृहीत्वा पठने यदि बाधा न अस्ति तदा शोभनं परन्तु यदि न पठ्यते तदा नेत्रचिकित्सकस्य समीपे गत्वा नेत्रपरीक्षणं कारयेत् अन्यथा नेत्रदृष्टि: दुर्बला भवेत्। अपि च शयान: अपि न पठेत्। प्रतिदिनं च सूर्योदये नेत्रव्यायाम: करणीय: येन वृद्धावस्थायाम् अपि उपनेत्रस्य आवश्यकता न भवेत्।

**I. एकपदेन उत्तरत** 1/2x4=2

**एकपद में उत्तर लिखिए**

**Answer in one word only**

(i) वर्तमानयुगं कीदृशम् अस्ति?

(ii) नेत्रव्यायाम: प्रतिदिनं कदा करणीय:?

(iii) पठने पुस्तकं नेत्राभ्याम् (25 से.मी.) दूरं भवेत् इति के कथयन्ति?

(iv) पठने कस्य सिद्धान्ता: अनुकरणीया:?

**II. पूर्णवाक्येन उत्तरत** 2x2=4

**पूर्णवाक्य में उत्तर दीजिए**

**Answer in a complete sentence**

(i) यदा पुस्तकम् अतिदूरं भवति तदा किं भवति?

(ii) कति दूरात् पुस्तकं पठनीयम्?

**III. निर्देशानुसारम् उत्तरत**

**निर्देशानुसार उत्तर दीजिए**

**Do as directed**

(i) 'कठिनम्' इत्यर्थे क: शब्द: प्रयुक्त:? 1

(ii) 'अतिसमीपम्' इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम्? 1

**IV. अस्य अनुच्छेदस्य कृते उचितं शीर्षकं लिखत।** 2

**इस अनुच्छेद का समुचित शीर्षक दीजिए**

**Write an appropriate title for this passage.**

## खण्ड: ख

## खण्ड–ख

## Section - B

## रचनात्मकलेखनम् 20

## Writing Skills

1/2x10=5

3. **भवतां नाम आशीष:। भवतां विद्यालये नूतनविधिना वार्षिकोत्सव: आयोजित:। तस्य वर्णनम् अधिकृत्य मित्रं सुमनं प्रति लिखिते पत्रे मञ्जूषात: रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां पत्रं पुन: लिखत।**

**आपका नाम आशीष है। आपके विद्यालय में नवीन विधि से वार्षिकोत्सव आयोजित किया गया। उसका वर्णन करते हुए मित्र सुमन को लिखे गये निम्नलिखित पत्र में मञ्जूषा से उपयुक्त शब्द चुनकर रिक्त स्थानों को पूर्णकर पत्र उत्तरपुस्तिका में पुन: लिखिए**

**You are Ashish. The Annual Day of your school has been organised in a novel way. Complete the following description in a letter written to your friend Suman. Select appropriate words from the box and rewrite the letter in your answer sheet.**

115 योजनाविहार:

1————————

2 _________सुमन, दिनांक:——————

3 _________ नमस्ते

ह्य: एव अस्माकं विद्यालये वार्षिकोत्सवसमारोह: सम्पन्न: जात:। तस्मिन्नेव अहम् अत्यधिकं व्यस्त: आसम्। जानासि किम् अभूतपूर्वम् एव आसीत् तस्य ? संक्षेपत: वर्णयामि।

अस्माकं कक्षा 4---------वर्गेषु विभक्ता। एक: वर्ग: समीपस्थेषु निर्धनानां कुटीरेषु गत्वा आवश्यकतानुसारम् अन्नं वस्त्रम् औषधिं च 5-------। द्वितीय: वर्ग: मदीय: आसीत्। अस्माभि: समीपवर्तिषु श्रमिकाणाम् आवासेषु 6------सूची निर्मिता येन तेषां शिक्षाव्यवस्था भवेत्। तृतीयेन वर्गेण निश्शुल्कचिकित्साशिविरस्य 7----------कृता। चतुर्थेन वर्गेण विद्यालयस्य 8--------वृक्षारोपणं कृतम्। एवं त्रिभि: दिवसै: समारोह: सम्पन्न: जात:। अनेन सेवाकार्येण सर्वेषां छात्राणां मनसि दिव्य-आनन्दस्य अनुभूति: जाता। यदि सर्वे विद्यालया: एवं कुर्वन्तु तर्हि अस्माकं देशस्य शीघ्रम् एव 9----------प्रगतिश्च भवेत्।

पितृभ्याम् नम:।

भवदीय: अभिन्नसुहृद्

10 ______________

मञ्जूषा

| |
|---|
| व्यवस्था, सस्नेहं, वाटिकायाम्, विकास:, आशीष:, |
| निरक्षरबालकानाम्, वितीर्णवान्, चतुर्षु, नागपुरत:, प्रिय |

**4. अधोलिखितसंवादे गौर्या: कथनानि पूरयित्वा उत्तरं केवलं लिखत।** **1x5=5**

**अधोलिखित संवाद में गौरी के कथनों को पूरा करके केवल उत्तर लिखो।**

**Complete Gauri's statements in the following dialogue. Write the answers only in the answer sheet.**

लक्ष्मी: गौरि! जानासि किम्? अहम् श्व: कन्याकुमारीं गमिष्यामि ?

गौरी किम् किम्! किं कन्याकुमारी कस्याश्चित् बालिकाया: नाम ?

लक्ष्मी: अरे नहि मुग्धे! एतत् कस्याश्चित् बालिकाया: नाम न अपितु स्थानस्य नाम।

गौरी (i) ______________________________

लक्ष्मी: अहम् श्व: स्वपितृभ्याम् सह गमिष्यामि।

गौरी किं कोऽपि अन्य: अपि गमिष्यति ?

लक्ष्मी: न, न! अन्य: कोऽपि न गमिष्यति।

गौरी (ii)______________________________

| | |
|---|---|
| लक्ष्मी: | सप्ताहान्ते आगमिष्यामि। |
| गौरी | तत्र त्वं किं किं द्रक्ष्यसि ? |
| लक्ष्मी: | तत्र अहम् कन्याकुमारीमन्दिरं द्रक्ष्यामि, विवेकानन्दस्मारकं च। |
| गौरी | (iii)________________________________________ |
| लक्ष्मी: | न न इदम् हिमालये नास्ति। भारतस्य दक्षिणकोणस्य अन्ते बिन्दुरूपेण दृश्यते एकः द्वीपः। |
| गौरी | (iv)________________________________________ |
| लक्ष्मी: | नहि! नहि! विवेकानन्दः तत्र न निवसति स्म। एकदा सः भारतभ्रमणं कुर्वन् 1892 तमे वर्षे कन्याकुमारीक्षेत्रम् आगतवान्। बाहुभ्याम् एव समुद्रस्य तरणं कृत्वा एतं द्वीपं प्राप्तवान्। |
| गौरी | किं विवेकानन्दः एव स्मारकं रचितवान्? |
| लक्ष्मी: | अये मुग्धे! सः तत्र स्मारकं न रचितवान्। श्री एकनाथरानाडेमहाभागाानां प्रयत्नैः 1970 तमे वर्षे एतत् अभवत्। |
| गौरी | (v)________________________________________ |
| लक्ष्मी: | आम्। न केवलं दर्शनीयम् एव अपितु भारतस्य प्रसिद्धेषु स्थलेषु अनन्यतमम् इति विख्यातम्। |
| गौरी | अहो मम माता आह्वयति। गच्छामि तावत् नमस्ते। पुनः मेलिष्यावः। |

**5. अधः दत्तं चित्रम् आधृत्य मञ्जूषायां प्रदत्तशब्दसहायतया पञ्चवाक्यानि उत्तरपुस्तिकायां लिखत।** **2x5=10**

**नीचे दिए गये चित्र को आधार बनाकर मञ्जूषा में दिए गये शब्दों की सहायता से पांच संस्कृत वाक्यों की रचना कीजिए।**

**Describe the following picture in five sanskrit sentences with the help of words given in the box.**



| |
|---|
| मत्स्यः, वनमानुषः, पञ्जरे, बकौ, शिशवः, लम्बते, सन्ति, उष्ट्रग्रीवः पशवः, जले, भगिन्या सह, सिंहः, जन्तुशालायाः, क्रीडतः |

**अथवा**

**(or)**

**(केवलं नेत्रहीनेभ्यः)**

**(For blind students only)**

**अधोलिखितानां शब्दानां सहायतया 'मम संस्कृत-शिक्षकः' इति विषयम् अधिकृत्य पञ्चवाक्येषु एकम् अनुच्छेदं लिखत** **2x5=10**

**नीचे दिये गये शब्दों की सहायता से ''मेरे संस्कृत-शिक्षक' विषय पर मञ्जूषा में दिए गए शब्दों की सहायता से पांच संस्कृत वाक्यों में एक अनुच्छेद लिखिए।**

**Write a passage in five sentences in sanskrit on the topic 'मम संस्कृत-शिक्षकः' with the help of the words given in the box.**

**सहायकाः शब्दाः**

| |
|---|
| व्यक्तित्वम्, अनुशासनप्रियः, आकर्षकम् संस्कृतशिक्षकः, प्रथमं श्लोकवाचनं, संस्कृते, सम्भाषणचतुरः, विनोदप्रियः, मधुरस्वरः, आदर्शः, प्रार्थनासभायां, सौम्यं वेषं, परिश्रमी, राष्ट्रियपुरस्कारविजेता |

**खण्डः 'ग'**

**खण्ड-ग**

**Section - C**

**(अनुप्रयुक्तव्याकरणम्)** **30**

**( Applied Grammar)**

6. **अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु सन्धिविच्छेदं सन्धिं वा कृत्वा उत्तरपुस्तिकायां लिखत** **1x3=3**

**निम्नलिखित वाक्यों में रेखाङ्कित पदों में सन्धि अथवा सन्धिविच्छेद करके पुनः लिखिए।**

**Join or disjoin Sandhi in the words in underlined letters in the sentences. Rewrite the sentences in your answer sheet.**

(क) **द्वावेव** नरौ धन्यौ शूरः दाता च भूतले।

(ख) कूपोदकं **वटच्छाया** च ग्रीष्मे शीतायते।

(ग) सन्तोष एव **सत्+निधानम्।**

**7.** **अधोलिखिते संवादे रेखाङ्कतपदेषु समासं विग्रहं वा कृत्वा उत्तरपुस्तिकायां लिखत** **1x4=4**

**निम्नलिखित संवाद में रेखांकित पदों में समास अथवा समास विग्रह करके उत्तरपुस्तिका में लिखिए।**

**Join or disjoin compounds in the underlined words given in the following dialogue. Rewrite the dialogue in the answer sheet.**

बालः पितामह! अत्र कीदृशी वाटिका अस्ति?

पितामहः वत्स, **'<u>पुष्पाणाम् वाटिका</u>'**

बालः तत्र कीदृशानि पुष्पाणि?

पितामहः **<u>पीतपुष्पाणि</u>।**

बालः अत्र मधुकण्ठेन कौ कूजतः?

पितामहः **<u>कोकिलमयूरौ</u>**

बालः अत्र कः वसति?

पितामहः **<u>महान् आत्मा यस्य सः</u>**

**8.** **अधोलिखिते कथने स्थूलाक्षरपदानां 'प्रकृतिम् प्रत्ययम्' च योजयित्वा लिख्यताम्** **1x5=5**

**निम्नलिखित कथन में स्थूलाक्षर पदों में प्रकृति प्रत्यय जोड़कर पुनः लिखिए।**

**Rewrite the sentences by adding suffixes to the given roots and words.**

(i) आदर्शः **(नगर+ठक्)** ---------सदा देशस्य विषये चिन्तयति।

(ii) मम देशः **(शक्ति+मतुप्)**---------भवेत्।

(iii) जगति **(विश्वबन्धु+तल्)**---------भवेत्।

(iv) दीनजनान् **(सेव्+शानच्)**----------जनाः पुण्यं लभन्ते।

(v) अस्माभिः परस्परं स्नेहेन **(वस्+तव्यम्)**---------।

**9.** **इमं संवादम् उचितैः अव्ययपदैः पूरयित्वा केवलम् उत्तराणि लिखत। (अव्ययानां सूची अधः प्रदत्ता)** **1x5=5**

**इस संवाद को उचित अव्ययपदों के द्वारा भरकर केवल उत्तर लिखिए। (अव्ययों की सूची नीचे दी गई है)**

**Complete the following dialogue with proper indeclinables. Write the answers only in the answer sheet. (List of indeclinables is given below)**

रमा विश्रुत! मेघाः 1.---------गर्जन्ति।

विश्रुतः आम् 2.-------------वृष्टिः भविष्यति।

रमा अवश्यम् त्वम् गृहात् 3.------मा गच्छ।

विश्रुतः तर्हि अहम् 4.--------- दूरदर्शने एव नाटकम् पश्यामि।

रमा विश्रुत! समाचारम् अपि शृणु, दशमकक्षायाः परीक्षापरिणामस्य सूचना 5.----------संभवेत्!

| अधुना, अपि, बहिः, नूनम्, उच्चैः |
|---|

**10. अधोलिखितसंवादम् उचितपदैः पूरयित्वा केवलम् उत्तराणि लिखत।** **1x3=3**

**निम्नलिखित संवाद को उचितपदों के द्वारा भरकर केवल उत्तर लिखिए।**

**Complete the following dialogue with appropriate words. Write answers only in the answer sheet.**

सुधा — दीपिके! त्वम् किम् लिखसि?

दीपिका — अहम् तु पर्यावरणविषये लेखं लिखामि।

सुधा — त्वया सुन्दरः लेखः 1.----------।

दीपिका — धन्यवादः। सम्प्रति2.---------------कुत्र गम्यते?

सुधा — विद्यालयम्। किम् त्वया न 3. -----------यत् अद्य तत्र वनोत्सवः अस्ति।

दीपिका — आम् ज्ञातम्। मया अपि सः वनोत्सवः द्रष्टव्यः।

**11. भवतः विद्यालये बालसभा अस्ति। तत्र कः कार्यक्रमः कतिवादने भविष्यति इति घटिकां दृष्ट्वा लिखत–**

**आपके विद्यालय में बालसभा है। वहां कौन सा कार्यक्रम कितने बजे होगा घड़ी देखकर लिखिए**

**There is बालसभा in your school. Write the timings of the programme as shown in the clock.** **1x4=4**

**यथा**

7.30  प्रातः सार्धसप्तवादने सरस्वती–प्रार्थना गीतानि च गीयन्ते।

7.45  (i) प्रातः--------वाद–विवाद–प्रतियोगितायाः उद्घाटनम्।

8.00  (ii)-----------वादने निर्णायकैः टिप्पण्यः।

11.15  (iii) ----------वादने प्राचार्येण निर्णयस्य घोषणा।

11.30  (iv) ततः----------वादने धन्यवाद–ज्ञापनम्।

**12. अधोलिखितवाक्येषु अङ्कानां स्थाने संख्यावाचकविशेषणैः रिक्तस्थानपूर्तिं कृत्वा पुनः लिखत।** **1/2x4=2**

**निम्नलिखित वाक्यों में अङ्कों के स्थान पर संख्यावाचक विशेषणपद भरकर पुनः लिखिए। (संख्यावाचक विशेषण)**

**Write numerical adjectives in place of numerals in Sanskrit.**

एकदा (1)----------वृक्षे (3)----------शुकाः निवसन्ति स्म। तत्र (2)-------------कोकिले अपि समागते (4)------खगेषु परस्परं घनिष्ठा मैत्री आसीत्।

13. **अस्मिन् अनुच्छेदे कानिचित् पदानि पुरुष-वचन-लिङ्ग-लकारदृष्ट्या अशुद्धानि सन्ति। तानि शुद्धीकृत्य लिखत।**

**इस अनुच्छेद में कुछ पद, पुरुष, वचन, लिङ्ग और लकार की दृष्टि से अशुद्ध हैं। उन्हें शुद्ध करके लिखिए।**

**There are some errors regarding पुरुष, वचन, लिङ्ग and लकार in this passage. Correct and write them again.**

(i) अहम् पत्रवाहकः अस्ति।

(ii) जनेभ्यः प्रतिदिनम् आगताः पत्राणि वितरामि।

(iii) ते पत्राणि प्राप्य न केवलं निजवृत्तानि अवागच्छन्; अपितु साक्षात्कारपत्रम्, नियुक्तिपत्रं, परीक्षाफलम् अपि प्राप्नुवन्ति।

(iv) अहम् स्वकर्म सदा निष्ठया करोति।

## खण्डः 'घ'

## खण्ड- घ

## Section-D

**(पठित-अवबोधनम्)** 35

**(Text books)**

14अ **अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत** 5

**अधोलिखित गद्यांश पढ़कर दिये गये प्रश्नों के उत्तर लिखिए**

**Read the following passage and answer the given questions.**

अथ व्रजन्तौ तौ गर्तसंकुले मार्गे क्रीडतः कांश्चित् बालकान् प्रेक्ष्य अवदताम्-भो भो बालकाः! कथम् अत्र नतोन्नते विषमे मार्गे क्रीडथ ? यदि कश्चिद् गर्ते पतेत् तर्हि सः विकलाङ्गो भूत्वा चिरं क्लेशम् अनुभवेत्। तेषु कश्चित् उद्दण्डः बालकः उवाच 'अयि भो! यद्येवं तर्हि कथं भवन्तौ सुपथं परित्यज्य अनेन कुपथेन गन्तुं प्रवृत्तौ ? अपि इदं श्रेयस्करम् ? अनेन वचसा प्रतिहतान्तःकरणः प्रच्छन्नभाग्यः अचिन्तयत्-किमिदं वचनं विशेषेण मामेव लक्ष्यीकरोति? अहो! कुमार्गम् आश्रितस्य मम कीदृशीयं क्लेशपरम्परा। गुरूपदेशेन इव अनेन बालवचसा मम चक्षुषी समुन्मीलिते। अद्यप्रभृति पापपथं त्यजामि इति विचिन्त्य मित्रं दुष्टबुद्धिम् अवदत् 'सखे! यदि मां मित्रस्थाने परिगणयसि, तर्हि साधुजनगर्हितम् इमं पन्थानं त्यजतु भवान्।'

**I. एकपदेन उत्तरत** 1/2x2=1

**एकपद में उत्तर लिखिए**

**Answer in one-word only**

(i) मार्गे व्रजन्तौ तौ क्रीडतः कान् अपश्यताम्?

(ii) प्रच्छन्नभाग्यः दुष्टबुद्धिं कीदृशं मार्गम् त्यक्तुम् अकथयत्?

**II पूर्णवाक्य में उत्तर लिखिए**

**Answer in a complete sentence.**

(i) कस्य वचनं श्रुत्वा प्रच्छन्नभाग्यः प्रतिहतान्तः करणः अभवत्? 1

(iii) प्रच्छन्नभाग्यस्य चक्षुषी केन उन्मीलिते ? 1

**III** **निर्देशानुसारम् उत्तरत** 1/2x2=1

**निर्देशानुसार उत्तर दीजिए**

**Do as directed**

अहो कुमार्गमाश्रितस्य मम कीदृशीयं क्लेशपरम्परा। अत्र 'मम' सर्वनामपदं कस्मै प्रयुक्तम्?

कथं भवन्तौ सुपथं परित्यज्य कुपथेन गन्तुम् प्रवृत्तौ इति बालकः कौ प्रति कथयति ?

**14आ अधोलिखितं श्लोकं पठित्वा प्रदत्तान् प्रश्नान् उत्तरत**

**अधोलिखित श्लोक को पढ़कर दिये गये प्रश्नों के उत्तर संस्कृत में लिखिए**

**Read the following verse and answer the questions that follow?**

पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।
पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता।।

**I** **एकपदेन उत्तरत** 1/2x2=1

**एक पद में उत्तर लिखिए**

**Answer in one-word only**

(i) पिता विद्याधनम् कस्मै यच्छति ?

(ii) विद्यादानाय पिता किम् करोति ?

**II** **पूर्णवाक्येन उत्तरत** 1

**पूर्णवाक्य में उत्तर लिखिए**

**Answer in a complete sentence.**

(i) पितुः तपस्यां ज्ञात्वा पुत्रः किम् अनुभवति?

**III** **निर्देशानुसारम् उत्तरत**

**निर्देशानुसार उत्तर दीजिए**

**Do as directed.**

(i) 'अस्य' इति सर्वनामपदम् कस्मै प्रयुक्तम्? 1

(ii) 'विद्याधनम् इति पदस्य किं विशेषणपदम् अत्र प्रयुक्तम्? 1

(iii) 'कथनम्' इत्यर्थे कः शब्दः अस्मिन् श्लोके प्रयुक्तः ? 1

**14 इ अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत**

**अधोलिखित नाट्यांश को पढ़कर दिये गये प्रश्नों के उत्तर संस्कृत में लिखिए** 5

**Read the following extracts from the play and answer the given questions**

स्थानम् (सरस्तीरम्, समयः- प्रभातवेला, तत्र राजहंसः राजहंसी सह विहरतः। नेपथ्ये काकध्वनिःश्रूयते।)

राजहंसः अये! किन्नु खलु सरस्तीरे विहरति मयि केनापि कर्कशैः कर्णकटुशब्दः 'का का' शब्दैः वातावरणम् आकुलीक्रियते?

राजहंसीः भर्तः! काकात् अन्यः को भवितुमर्हति? अस्य वर्णः अपि कृष्णः, कर्म अपि कृष्णम्। मेध्यम् अमेध्यं सर्वमेव भक्षयति। कर्णकटुशब्दैः-

काकः (प्रविश्य, सक्रोधम्) आः किमुक्तवती भवती? यदि अहं कृष्णवर्णः तर्हि श्रीरामस्य वर्णः कीदृशः ? श्रीवासुदेवस्य वर्णः कीदृशः? मुग्धे। अहं तु अतीव कर्त्तव्यपरायणः। प्रभाते 'का-का' ध्वन्या सुप्तान् प्रबोधयामि कर्मसु च विनियोजयामि।

राजहंसः हं! किमनेन ? एतत् कार्यं तु कुक्कुटोऽपि करोति।

काकः (विहस्य) कुक्कुट! अरे अद्य कुतः कुक्कुटाः नगरेषु। अहमेव सर्वत्र सुलभः।

राजहंसी भो भो वाचाल! स्वीयैः कटुभिः क्वणितैः जनजागरणात् अन्यत् तु किमपि न करोषि!

**I एकपदेन उत्तरत** **1x2=2**

**एक पद में उत्तर लिखिए**

**Answer in one-word only**

(i) काकः कस्याः वचनं श्रुत्वा क्रुध्यति ?

(ii) राजहंसः हंसी च कुत्र विहरतः स्म ?

**II पूर्णवाक्येन उत्तरत-** **1/2x2=1**

**पूर्णवाक्य में उत्तर लिखिए**

**Answers in a complete sentence.**

(i) कुक्कुटः कान् प्रबोधयति ?

(ii) अत्र कति पात्राणि वार्तालापं कुर्वन्ति ?

**III रिक्तस्थानं पूरयत**

**रिक्त स्थानों की पूर्त्ति कीजिए**

**Fill in the blanks**

(i) काकः एव यस्य (क)---------अपि कृष्णः (ख)----------अपि कृष्णं भवति 1

(ii) 'अहमेव सर्वत्र सुलभः' इत्यत्र 'अहं' सर्वनामपदं कस्मै प्रयुक्तम् ? 1

15 **प्रदत्ते भावार्थे रिक्तस्थानपूर्त्तिः क्रियताम्** **1x3=3**

**दिये गये भावार्थ में रिक्त स्थानों की पूर्ति कर के उत्तर पुस्तिका में लिखिए**

**Fill in the blanks in the given explanations (भावार्थ) and write them again in your answer sheet.**

अ. धनस्य निःसारलघोः स सारो,
यद् दीयते लोकहितोन्मुखेन,
निधानतां याति हि दीयमानम्,
अदीयमानं निधनैकनिष्ठम्।

**भावार्थः-** धनम् सारहीनम् अस्ति। तस्य अयम् एव (1)--------यत् धनम् संसारस्य हिताय। (2)--------- तत् निधिरूपेण सुरक्षितं भवति, यत् धनम् न दीयते तस्य तु एकपदे एव (3)--------- सञ्जायते।

आ. सर्वस्तरतु दुर्गाणि, सर्वो भद्राणि पश्यतु। 1x3=3

सर्वः कामानवाप्नोतु, सर्वः सर्वत्र नन्दतु।।

अस्मिन् श्लोके कवेः मंगलकामना अस्ति यत् सर्वः (1)---------तरतु। सर्वः भद्राणि (2)-----------। सर्वः कामान् (3) -------। सर्वः यत्र कुत्र अपि वसेत् तत्र एव प्रसीदेत्।

**16. अधोलिखितश्लोकयोः अन्वयम् समुचितक्रमेण पूरयत।** **1½+1½=3**

**निम्नलिखित श्लोकों का अन्वय उचित क्रम में पूरा कीजिए।**

**Complete the following prose order reordering of the following verses.**

(अ) प्रार्थितं ते मया चक्रं देवदानवपूजितम्।

अजेयः स्यामिति विभो! सत्यमेतद् ब्रवीमि ते।।

**अन्वयः-** विभो! अजेयः (1)----------इति मया देवदानवपूजितम् (2)-------------ते प्रार्थितम् (3)------------ते सत्यं ब्रवीमि।

(आ) काम एष क्रोध एष रजोगुणसमुद्भवः।

महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्।।

**अन्वयः** (1)---------एषः क्रोधः एषः रजोगुणसमुद्भवः महाशनः (2)----------(च अस्ति) (3)--------इह वैरिणं विद्धि।

**17. उदाहरणानुसारं रेखाङ्कितं पदम् आधृत्य उदाहरणानुसारम् प्रश्ननिर्माणं कुरुत।** **1x4=4**

**उदाहरण के अनुसार रेखाङ्कित पदों के आधार पर प्रश्ननिर्माण कीजिए।**

**Frame questions based on the underlined words in the sentences as shown in the given example.**

**यथा** - स्वाध्यायः **<u>तपः</u>**।

स्वाध्यायः अपि किम् ?

(i) अस्मिन् प्रदेशे <u>पञ्चशदधिकाः</u> नद्यः प्रवहन्ति।

(ii) कमलपत्रे स्थितं <u>जलवत्</u> तरलं हि यौवनम्।

(iii) <u>ब्रह्मणः</u> आयुः शतं वर्षाणि।

(iv) कामः <u>सङ्गात्</u> सञ्जायते।

**18. घटनाक्रमानुसारं निम्नलिखितपदानि पुनः लिखत।** **½x8=4**

**घटनाक्रम के अनुसार निम्नलिखित वाक्यों को फिर से लिखिए।**

**Rewrite the following sentences in their sequence.**

(i) राजगृहे जिह्वालोलुपः एकः मेषः महानसं प्रविश्य यत् किमपि खादति स्म।

(ii) तत्रस्थान् दग्धान् अश्वान् दृष्ट्वा राज्ञा वैद्याः आहूताः।

(iii) मेषताडनं दृष्ट्वा वानरयूथपः कपीन् राजभवनं त्यक्तुम् अकथयत्।

(iv) वानरमेदः एव औषधम् इति श्रुत्वा मृत्युभयात् कपयः पश्चातापम् अकुर्वन्।

(v) एकस्मिन् प्रासादे चन्द्रनाम्नः भूपतेः पुत्राः वानरैः सह क्रीडन्ति स्म।

(vi) यदा वानराः स्वर्गतुल्यान् भोज्यपदार्थान् त्यक्तुं न ऐच्छन् तदा वानरयूथपः एकाकी वनमगच्छत्।

(vii) सूपकाराः तं येन केन पदार्थेन ताडयन्ति स्म।

(viii) एकदा ज्वलितकाष्ठेन ताडितः ज्वलन् मेषः अश्वशालां प्राविशत्।

18 **अधोलिखितपङ्क्तिषु रेखाङ्कितपदानां प्रसङ्गानुसारम् शुद्धम् अर्थं चिनुत।** **1x3=3**

**निम्नलिखित पंक्तियों में रेखाङ्कितपदों के प्रसङ्गानुसार शुद्ध अर्थ चुनकर लिखिए।**

**Select and write the appropriate meaning of the underlined words as per reference to their context.**

**यथा**-----------सर्वदाऽस्माकं सन्निधिं क्रियात्

(i) सर्वदायिका, (ii) सर्वाधिका, (iii) निरन्तरम्

I शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा

(i) सेवा, (ii) श्वश्रूः, (iii) श्रोतुमिच्छा

II आचार्यात्पादमादत्ते, पादं शिष्यः स्वमेधया।

(i) चरणम् (ii) चतुर्थांशम् (iii) श्लोकस्य पंक्तिम्

III पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्।

(i) त्यज (ii) मारय (iii) प्रजा।

# आदर्शसंस्कृतप्रश्नपत्रम् 2
## अङ्कयोजना 2

**विषयः संस्कृतम् (सम्प्रेषण-आधारितम्)**

**कक्षा दशमी** — **कोडसंख्या - 122**

**अवधिः होरात्रयम्** — **पूर्णांकाः-100**

**खण्डः 'क'**

**(अपठित-अवबोधनम्)**

**अस्मिन् खण्डे अनुच्छेद्वयम् अस्ति** 5x10=15

**प्रथमः अनुच्छेदः 40-50 शब्दपरिमितः।** 5

**प्रश्नाः**

| क्रमांकः | उद्देश्यम् | प्रश्न-प्रकारः | अपेक्षित-उत्तराणि | अंक-संकेतः | अंक-विभागः |
|---|---|---|---|---|---|
| I अ | तथ्य-बोध-परीक्षणम् | अतिलघूत्तरः एकपदेन उत्तरम् | (i) अमेरिकादेशे | ½ | |
| | | | (ii) उलूकवत् | ½ | |
| | | | (iii) विवेकम् | ½ | |
| | | | (iv) लक्ष्म्याः | ½ | 2 |
| II | तथ्य-बोध-परीक्षणम् | लघूत्तरः पूर्णवाक्येन उत्तरम् | 'अस्माकं' पदं भारतीयेभ्यः प्रयुक्तम् | | |
| | | | तथ्यकृते एकः अङ्कः | 1 | |
| | | | भाषाकृते एकः अङ्कः | 1 | 2 |
| III | भाषिकतत्त्व-प्रयोगपरीक्षणम् (i) क्रियाविशेषण-क्रिया-सम्बन्ध-परीक्षणम् | क्रियापदस्य चयनम् | उक्तवान् इति क्रियापदस्य | | 1 |

5

2 **द्वितीयः अनुच्छेदः 80–100 शब्द–परिमितः। अंकाः–10**

| क्रमांकः | उद्देश्यम् | प्रश्न–प्रकारः | अपेक्षित–उत्तराणि | अंक–संकेतः | अंक–विभागः |
|---|---|---|---|---|---|
| I | तथ्य–बोध–परीक्षणम् | अतिलघूत्तरः एकपदेन | (i) विज्ञानमयम् | ½ | |
| | | | (ii) सूर्योदये | ½ | |
| | | | (iii) नेत्रविशेषज्ञाः | ½ | |
| | | | (iv) विज्ञानस्य | ½ | 2 |
| II | तथ्य–बोध–परीक्षणम् | लघूत्तरः पूर्णवाक्येन | (i) यदा पुस्तकम् अतिदूरं भवति तदा अपि पठनं दुष्करं भवति। | 2 | |
| | | | (ii) पुस्तकपठने पञ्चविंशति सेन्टिमीटरमितं दूरम् अन्तरं समीचीनम् | 2 | 4 |
| III | भाषिकतत्त्व–प्रयोगपरीक्षणम् | अतिलघूत्तरः एकपदेन | | | |
| | | पर्यायवाचि–पदचयनम् | दुष्करम् | 1 | |
| | | विलोमपद–चयनम् | अतिदूरम् | 1 | 2 |
| IV | शीर्षकप्रदानम् | अतिलघूत्तरः | पठने विज्ञान–सिद्धान्ताः<br>पठने विज्ञानम्<br>पठनं नेत्ररक्षणं च।<br>पुस्तकपठने सावधानता<br>अथवा<br>अन्यत् युक्तिसङ्गतं शीर्षकम् | 2 | 2 |
| | | | | | 10 |

## खण्डः 'ख'

### (रचनात्मकलेखनम्)

**अस्मिन् खण्डे त्रयः प्रश्नाः सन्ति। प्रथमे लिखिते पत्रे मञ्जूषातः चित्वा विभिन्नरिक्तस्थानानाम् पूर्त्तिं कृत्वा पत्रं पुनः लेखनीयम्। दशरिक्तस्थानानि सन्ति। प्रतिशुद्धरिक्तस्थानपूर्तिकृते अर्धः (½) अङ्कः निर्धारितः।**

| क्रमांकः | उद्देश्यम् | प्रश्न-प्रकारः | अपेक्षित-उत्तराणि | अंक-संकेतः | अंक-विभागः |
|---|---|---|---|---|---|
| 3. I | पत्रलेखने औपचारिककार्य-परीक्षणम् | पत्रप्रेषकस्य स्थानसङ्केतः | 1. नागपुरतः | ½ | |
| | | सम्बोधनम् | 2. प्रिय | ½ | |
| | | अभिवादनस्य विशेषणपदम् | 3. सस्नेहम् | ½ | |
| II | | नाम पत्रप्रेषकस्य | 10. आशीषः | ½ | 2 |
| | पत्रलेखने विषयवस्तु-बोधपरीक्षणम् | सन्दर्भानुकूलं | 4. चतुर्षु | ½ | |
| | | विषयवस्तुज्ञानम् | 5. वितीर्णवान् | ½ | |
| | | (रिक्तस्थानपूर्त्तिः) | 6. निरक्षरबालकानाम् | ½ | |
| | | | 7. व्यवस्था | ½ | |
| | | विषयस्तुज्ञानम् | 8. वाटिकायाम् | ½ | |
| | | | 9. विकासः | ½ | 3 |
| | | | | | 5 |

**4. अस्मिन् प्रश्ने प्रदत्तसंवादे सन्दर्भानुकूला रिक्तस्थानपूर्त्तिः अपेक्षिता अत्र पञ्चरिक्तस्थानानि सन्ति। प्रतिशुद्धरिक्तस्थानपूर्तिकृते एकः अङ्कः निर्धारितः। (उत्तरसङ्केताः वार्तालापात् एव ग्रहीतव्याः)**

| | | | | |
|---|---|---|---|---|
| संवादे सन्दर्भानुकूलम् वाक्यप्रयोगपरीक्षणम् | रिक्तस्थानपूर्तिः | (i) त्वम् कदा केन सह गमिष्यसि ? | 1 | |
| | | (ii) कदा आगमिष्यसि ? | 1 | |
| | | (iii) किम् इदम् हिमालये अस्ति ? | 1 | |
| | | (iv) किं तत्र विवेकानन्दः निवसति स्म ? | | 1 |
| | | (v) किं दर्शनीयं तत् ? | 1 | 5 |

**5. एषः प्रश्नः चित्रवर्णनसम्बद्धः। अस्मिन् प्रश्ने चित्रं दृष्ट्वा मञ्जूषायाम् प्रदत्तशब्दसूचीसहायतया पञ्चवाक्येषु वर्णनम् अपेक्षितम्। प्रतिवाक्यम् अङ्कद्वयं निर्धारितम्।**

| | | | |
|---|---|---|---|
| अवबोधपूर्वक- | चित्रवर्णनार्थम् | छात्रा: स्वतन्त्ररूपेण | पञ्चवाक्यानि |
| वाक्यसंरचना- | वाक्यनिर्माणम् | मञ्जूषात: शब्दान् | 1+1 |
| प्रयोगपरीक्षणम् | | चित्वा वाक्यनिर्माणं | 1+1 |
| | | करिष्यन्ति। | 1+1 |
| | | (पञ्चवाक्यानि, प्रतिवाक्यम् | 1+1 |
| | | एक: अङ्क: तथ्यार्थम् | 1+1 |
| | | एक अङ्क: भाषाप्रयोगाय) | |
| | | | 10 |

## (अथवा)
## (केवलं नेत्रहीनेभ्य:)
## (For blind students only)

**प्रदत्तसङ्केतान् आश्रित्य ''मम प्रिय: शिक्षक:'' इति विषये पञ्च संस्कृत वाक्यलेखनम् अपेक्षितम्। (प्रतिवाक्यम् कृते अङ्कद्वयम् निर्धारितम् एक: अङ्क: शुद्धतथ्यकृते एक: च शुद्धभाषाप्रयोगाय।)**

| | | | |
|---|---|---|---|
| अवबोधपूर्वक- | वर्णनार्थम् | छात्रा: मञ्जूषाया: | 1+1 |
| वाक्यसंरचना- | वाक्यनिर्माणम् | सहायतया वाक्यानि | 1+1 |
| प्रयोगपरीक्षणम् | | लेखिष्यन्ति | 1+1 |
| | | (पञ्चवाक्यानि, प्रतिवाक्यम् | 1+1 |
| | | एक: अङ्क: याथार्थ | 1+1 |
| | | एक: अङ्क: भाषाप्रयोगाय | |
| | | | 10 |

**अङ्कयोजना 2** **आदर्शसंस्कृतप्रश्नपत्रम् 2**

## खण्ड: 'ख'
### (अनुप्रयुक्तव्याकरणम्)

**अस्मिन् खण्डे भाषाया: व्यावहारिकप्रयोग: अपेक्षित:।**

| क्रमांक: | उद्देश्यम् | प्रश्न-प्रकार: | अपेक्षित-उत्तराणि | अंक-संकेत: | अंक-विभाग: |
|---|---|---|---|---|---|
| **6.** | वाक्येषु सन्धि:/ | अनुप्रयोगात्मक: | (i) द्वौ+एव | 1 | |
| | सन्धिच्छेद-परीक्षणम् | कोष्ठे दत्तानां | (ii) वट+छाया | 1 | |
| | | पदयुग्मानां | (iii) सन्निधानम् | 1 | |
| | | सन्धिकरणम्/ | | | |
| | | सन्धिच्छेद:वा | | | 3 |

| | | | | | |
|---|---|---|---|---|---|
| **7.** | वाक्येषु समस्तपदानां विग्रहः असमस्तपदानां समसनम् | अतिलघूत्तरः बोधपरकः | (i) पुष्पवाटिका<br>(ii) पीतानि पुष्पाणि<br>(iii) कोकिलः च मयूरः च<br>(iv) महात्मा | 1<br>1<br>1<br>1 | 4 |
| **8.** | कृदन्त-तद्धितप्रत्ययानां प्रयोगपरीक्षणम् | प्रकृति-प्रत्यय-योगेन वाक्येषु रिक्तस्थानपूर्त्तिः | (i) शक्तिमान्<br>(ii) विश्वबन्धुता<br>(iii) सेवमानाः<br>(iv) वस्तव्यम्<br>(v) पवित्रा | 1<br>1<br>1<br>1<br>1 | 5 |
| **9.** | वाक्येषु अव्यय-पद-प्रयोग-परीक्षणम् | बोधपरकः संवादे रिक्तस्थानेषु उचित-अव्ययप्रयोगेण वाक्ययोजनम् | (i) उच्चैः<br>(ii) नूनम्<br>(iii) बहिः<br>(iv) अधुना<br>(v) अपि | 1<br>1<br>1<br>1<br>1 | 5 |
| **10.** | वार्तालापे कर्मवाच्यप्रयोग-परीक्षणम् | रिक्तस्थानेषु क्रियापदेन कर्मपदेन च रिक्तस्थानपूर्त्तिः | (i) लिख्यते<br>(ii) त्वया<br>(iii) ज्ञायते | 1<br>1<br>1 | 3 |
| **11.** | घटिकां दृष्ट्वा संस्कृतेन समय-लेखन-परीक्षणम् | वाक्येषु समय-द्योतकैः पदैः रिक्तस्थानपूर्त्तिः | (i) पादोन-अष्टवादने<br>(ii) अष्टवादने<br>(iii) सपाद-एकादशवादने<br>(iv) सार्धैकादशवादने | 1<br>1<br>1<br>1 | 4 |
| **12.** | संख्यावाचकपद-प्रयोगपरीक्षणम् | अङ्कानाम् स्थाने वाक्येषु संस्कृतपदैः रिक्तस्थानपूर्त्तिः | (i) एकस्मिन्<br>(ii) त्रयः<br>(iii) द्वे<br>(iv) पञ्चसु | ½<br>½<br>½<br>½ | 2 |
| **13.** | वाक्य-संरचनायाम् शुद्धलिङ्गवचन-क्रियापदप्रयोग-परीक्षणम् | लिखितेषु स्थूलाक्षरपदेषु अशुद्धिसंशोधनम् | (i) अस्मि<br>(ii) आगतानि<br>(iii) अवगच्छति<br>(iv) करोमि | 1<br>1<br>1<br>1 | 4 |
| | | | | | 30 |

## खण्डः 'घ'
### (पठित-अवबोधनम्)

अस्मिन् खण्डे सर्वे प्रश्नाः पाठ्यपुस्तकम् (मणिका भागः II) आधारिताः।

| क्रमांकः | उद्देश्यम् | प्रश्न-प्रकारः | अपेक्षित-उत्तराणि | अंक-संकेतः | अंक-विभागः |
|---|---|---|---|---|---|
| 14. अ | पठित-गद्यांश-बोध-परीक्षणम् | एकपेदन उत्तरम् | (i) बालकान् | ½ | |
| | | | (ii) कुपथम्/कुमार्गम् | ½ | 1 |
| | तथ्यबोधः | पूर्णवाक्येन उत्तरम् | (i) उद्दण्डबालकस्य वचनं प्रच्छन्नभाग्यः प्रतिहतान्तः करणः आगवत् | 1 | |
| | | | (ii) बालवचसा प्रच्छन्नभाग्यस्य चक्षुषी उन्मीलिते | 1 | 2 |
| | भाषिकतत्व-परीक्षणम् | सर्वनामस्थाने संज्ञाप्रयोगः | प्रच्छन्भाग्याय बालकः | 1 | 1 |
| | | कः कं कथयति | प्रच्छन्नभाग्यम् दुष्टबुद्धिम् च कथयति | ½ + ½ | 1 |
| | | | | | 5 |
| 14. आ | पठितपद्यबोध-परीक्षणम् | (I) एकपदेन उत्तरम् | (i) पुत्राय | | 1 |
| | | | (ii) तपः | | |
| | | (II) पूर्णवाक्येन | कृतज्ञताम् अनुभवति पितुः तपः ज्ञात्वा पुत्रः | 1 x 1= 1 | 1 |
| | भाषिकतत्व-प्रयोगपरीक्षणम् | (III) विशेषणपदचयनम् | (i) अस्य इति पदं पुत्राय प्रयुक्तम् | | |
| | | | (ii) महत् इति विशेषण-पदं प्रयुक्तम् | 1 | |
| | | | (iii) उक्तिः शब्दः। | 1 | 3 |
| | | | | | 5 |
| 14. इ | पठितनाट्यांश-बोधपरीक्षणम् | एकपदेन उत्तरम् | (i) राजहंस्या | ½ | |
| | | | (ii) सरस्तीरे | ½ | 1 |
| | | पूर्णवाक्येन उत्तरम् | (i) कुक्कुटः सुप्तान् प्रबोधयति | 1 | |
| | | | (ii) अत्र त्रीणि पात्राणि वार्तालापं कुर्वन्ति | 1 | 2 |

| | | | | | |
|---|---|---|---|---|---|
| III | भाषिकतत्त्वप्रयोग-परीक्षणम् | रिक्तस्थानपूर्त्तिः | (i) (क) वर्णः (ख) कर्म | ½ + ½ = | 1 |
| | | | (ii) काकाय प्रयुक्तम् | 1 | 1 |
| | | | | | 5 |
| **15.** | भावार्थबोध- परीक्षणम् | प्रदत्तेषु रिक्तस्थानपूर्त्तिः | (i) सारः | 1 | |
| | | | (ii) दीयते | 1 | |
| | | | (iii) निधनम् | 1 | 3 |
| | | आ. | (i) दुर्गाणि | 1 | |
| | | | (ii) पश्यतु | 1 | |
| | | | (iii) अवाप्नोतु | 1 | 3 |
| | | | | | 6 |
| **16.** | पद्यस्य अन्वय-परीक्षणम् | प्रदत्ते अन्वये श्लोकं पठित्वा रिक्तस्थान-पूर्त्तिः | (i) स्याम् | ½ | |
| | | | (ii) चक्रम् | ½ | |
| | | | (iii) एतत् | ½ | |
| | | प्रदत्ते अन्वये श्लोकं पठित्वा रिक्तस्थान-पूर्त्तिः | (i) कामः | ½ | |
| | | | (ii) महापाप्मा | ½ | |
| | | | (iii) एनम् | ½ | |
| | | | | | 3 |
| **17.** | प्रश्ननिर्माणकौशल-परीक्षणम् | प्रदत्तस्थानेषु स्थूल-पदानि आधृत्य प्रश्ननिर्माणम् | (i) कति | ½+½ | |
| | | | (ii) किम् | ½+½ | |
| | | | (iii) कस्य | ½+½ | |
| | | | (iv) कस्मात् | ½+½ | |
| | | | (अर्धाङ्कः शुद्धप्रश्नवाचक-सर्वनामकृते, अर्धाङ्कः च प्रश्नवाचकचिह्नकृते) | | |
| **18.** | तर्कपूर्णघटनाक्रम-संयोजनपरीक्षणम् | प्रदत्तघटनानाम् क्रमनिर्धारणम् | v,i,vii,iii, vi,viii,ii,iv | ½x8 | |
| | | | | | 4 |
| **19.** | प्रसङ्गानुसारं शब्दार्थबोधपरीक्षणम् | प्रदत्तविकल्पेभ्यः प्रसङ्गानुसारं शुद्ध-अर्थ-चयनम् | (i) श्रोतुमिच्छा | 1 | |
| | | | (ii) चतुर्थांशम् | 1 | |
| | | | (iii) मारय | 1 | |
| | | | | | 3 |

35

# आदर्शसंस्कृतप्रश्नपत्रम् 2
## पाठ्यक्रमपरिशीलनम्
## (Coverage of Syllabus)

**कक्षा दशमी** | **पाठ्यपुस्तक – मणिका भागः II**

**खण्डः 'क' (अपठित-अवबोधनम्)**

**5+10=15**

| क्रमांकः | विषयः | | अंकः |
|---|---|---|---|
| 1 | अपठितः अनुच्छेदः 47 शब्दपरिमितः | | |
| | एकपदेन उत्तरम् | ½x4 | 2 |
| | पूर्णवाक्येन उत्तरम् | 2x1 | 2 |
| | भाषिक-तत्त्व-परीक्षणम् | ½x1 | 1 |
| | | | 5 |
| 2. | द्वितीयः अपठितः अनुच्छेदः 98 शब्दपरिमितः | | |
| | एकपदेन उत्तरम् | ½x4 | 2 |
| | पूर्णवाक्येन उत्तरम् | 2x2 | 4 |
| | समानार्थचयनम् | | 1 |
| | विलोमपदचयनम् | | 1 |
| | शीर्षकप्रदानम् | | 2 |
| | | | 10 |

**खण्ड ख रचनात्मकं कार्यम्**

| | | | |
|---|---|---|---|
| 3. | पत्रलेखनम् (अनौपचारिकपत्रम्)<br>मित्रं प्रति विद्यालयस्य वार्षिकोत्सवस्य वर्णनं<br>कुर्वन् पत्रमेकम् (रिक्तस्थानपूर्त्तिमाध्यमेन) | | |
| | औपचारिककार्यपरीक्षणम् | ½x4 | 2 |
| | बोधपरीक्षणम् | ½x6 | 3 |
| | | | 5 |
| 4. | संवादे रिक्तस्थानपूर्त्तिः- वार्तालापे संदर्भानुकूलं<br>शब्दप्रयोगपरीक्षणम् प्रतिशुद्ध-पूर्तिकृते अर्धः अङ्कः | ½x5 | 5 |
| 5. | चित्रवर्णनम् प्रदत्तसूचीसाहाय्येन पंचवाक्यानि | | |

| | | | |
|---|---|---|---|
| | लेखितव्यानि | | 10 |
| | अथवा | | |
| | (केवलं नेत्रहीनेभ्य:) | | 10 |
| | प्रदत्तसङ्केतान् आश्रित्य 'मम संस्कृतशिक्षक:' | | |
| | इति विषयम् अधिकृत्य पञ्चवाक्येषु अनुच्छेदलेखनम् | | 20 |

**खण्ड: ग, अनुप्रयुक्त-व्याकरणम्**

| | | | |
|---|---|---|---|
| **6.** | सन्धिविच्छेद: सन्धिज्ञान - परीक्षणम्<br>अयादिसंधि: चकारस्य आगम: प्रथमस्थाने तृतीय: वर्ण: | 1x3 | 3 |
| **7.** | संवादे समस्तपदं/समासविग्रह: अनुप्रयोगात्मक:<br>षष्ठीतत्पुरुष:, कर्मधारय:, द्वन्द्व:, बहुव्रीहि:। | 1x4 | 4 |
| **8.** | अनुप्रयोगात्मकरूपेण प्रकृति-प्रत्यय - प्रयोगपरीक्षणम्<br>मतुप्, तल्, शानच्, तव्यत्, टाप् | 1x5 | 5 |
| **9.** | अव्ययशब्दै: संवादस्य पूर्त्ति:<br>(i) उच्चै:<br>(ii) नूनम्<br>(iii) बहि:<br>(iv) अधुना<br>(v) अपि | 1x5 | 5 |
| **10.** | संवादे उचितपदै: पूर्त्ति:<br>कर्मवाच्यप्रयोग: लिख्यते, त्वया, ज्ञायते | 1x3 | 3 |
| **11.** | समय-ज्ञान-परीक्षणम्<br>संस्कृतेन समयलेखनं च<br>(7.45,8.00,11.15,11.30) | 1x4 | 4 |
| **12.** | गणनापरीक्षणम्<br>(i) एक, पु० सप्तमी<br>(ii) त्रि, पु० प्रथमा<br>(iii) द्वि, स्त्री प्रथमा | | |

| | | | |
|---|---|---|---|
| | (iv) पञ्चन्, पु० सप्तमी | 1x4 | 2 |
| 13. | पुरूष-वचन-लिङ्ग लकार-विभक्तिदृष्ट्या | | |
| | अशुद्धशब्दानाम् संशोधनम् | | |
| | (i) कर्ता-क्रिया- शुद्धमेलनम् | | |
| | (ii) विशेषण-विशेष्यान्विति: | | |
| | (iii) लकारविषयकाशुद्धि: | | |
| | (iv) लिङ्ग-अशुद्धि: | | 4 |
| | | | 30 |

| **प्रश्न-संख्या:** | **खण्ड: 'घ' पठित - अवबोधनम्** | | **35** |
|---|---|---|---|
| | विषय: | पाठ-संख्या | अंका: |
| 14. | (i) गद्यांश: **साधुवृत्तिं समाचरेत्** | 6 | |
| | अथ व्रजन्तो तौ---त्यजतु भवान् | | 5 |
| | (ii) पद्य: **तिरुक्कुरल्-सूक्ति-सौरभम्** | 8 | |
| | पिता यच्छति पुत्राय---कृतज्ञता | | 5 |
| | (iii) नाट्यांश: **रमणीया हि सृष्टिरेषा** | 7 | 5 |
| | स्थानं सरस्तीरम् समय: | | |
| | प्रभातवेला किमपि न करोषि | | |
| 15. | भावबोधनम् (i) **नास्ति त्यागसमं सुखम्** | 4 | 3 |
| | धनस्य नि:सारलघो: ----1 | | |
| | (ii) **कालोऽहम्।** | 11 | 3 |
| | सर्वस्तरतु---नन्दतु | | 6 |
| 16. | अन्वये रिक्तस्थानपूर्त्ति: **राष्ट्रं संरक्ष्यमेव हि** | 9 | 1½ |
| | प्रार्थितं----ब्रवीमि ते।। | | |
| | **अभ्यासवशगं मन:** | 5 | 1½ |
| | काम: एष:----वैरिणम् | | 3 |
| 17. | प्रश्ननिर्माणम् - **वाङ्मयं तप:** इति पाठात् | | |
| | (i) **स्वागतं भो अरुणाचलेऽस्मिन्** | 10 | |

| | | | |
|---|---|---|---|
| | **(ii) किम् किम् उपादेयम्** | 3 | |
| | **(iii) कालोऽहम्** | 11 | |
| | **(iv) अभ्यासवशगं मनः** | 5 | 4 |
| **18.** | घटनाक्रमसंयोजनम् | | |
| | **आज्ञा गुरुणां ह्यविचारणीया** | 2 | 4 |
| **19.** | शुद्ध–अर्थ–चयनम् | | |
| | (i) शुश्रूषा | 1 | |
| | (ii) पादम् | 1 | |
| | (iii) प्रजहि | 5 | 3 |
| | | | 35 |